S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



**Scurrile, Scurrilous,** *a.* परुष, तीक्ष्ण; दुरुक्त, अश्लील, अदक्षिण, दुर्वाच्य. 2 कटुभाषिन्, दुर्मुख, मुखर, वाग्दुष्ट. **Scurrility,** *s.* पारुष्यं, मौखर्यं, दुरुक्तं, &c.

**Scurvy,** *s.* शीतादः, लवणरक्तं. **-***a.* कुत्सित, गर्ह्य, तुच्छ, नीच; *See* **Mean.**

**Scutcheon,** *s.* कुलीनचिह्नपत्रं, कौलीनकोषः.

**Scuttle,** *s.* करंडः, मंजूषा. **2** छिद्रं. **-***v. i.* त्वर् [ 1 A.

**Scythe,** *s.* लवित्रं, दात्रं, खड्गीकं, शस्यकर्तरिका.

**Sea,** *s.* सागरः, समुद्रः, उदधिः, अर्णवः, जलधिः, वारिधिः, अपांपतिः; *See* **Ocean;** 'a rough s.' क्षुब्धार्णवः; 's. of worldly existence' भवसागरः, संसारार्णवः; 's. of troubles' क्लेशसागरः, दुःखार्णवः, &c.; 'go to s.' नाविकः-सांयात्रिकः-भू 1 P, नाविकवृत्तिं सेव् 1 A; 'beyond the s. s' द्वीपांतरं-रे; 's.-beat' तरंगाहत; 's.-faring' समुद्रग-यायिन्, सांयात्रिक; 's.-fight' नौयुद्धं; 's.-girt' *See* **Girt;** 's.-green' श्यामहरित, सागरवर्ण; 's.-gull' करंटः; 's.-man' नाविकः, समुद्रगः, पोतवाहः; 's.-port' पोताश्रयस्थानं, पोतशरणं, नौकाश्रयः; 's.-shore' समुद्रतटं-तीरं, वेला, रोधस् *n.*; 's.-sick' समुद्रच्छर्दिष्मत्; 's.-side' समुद्रवेला &c.

**Seal,** *s.* मुद्रा, ( fig. also ); 'opening the s. of sleep' क्षिपन्निद्रामुद्रां ( Mal. 2 ); 'open it, preserving the s. and show me' मुद्रां परिपालयन् उद्घाट्य दर्शय ( Mu. 5 ); 's. of the lips' ओष्ठमुद्रा. **2** मकरः, नक्रः **-***v. t.* मुद्रयति ( D. ). **2** निर्णी 1 P, स्थिरीकृ 8 U, दृढीकृ, दृढयति ( D. ); 'the defeat in that battle s. ed his fate' पराजयेन तस्य भाविगतिः एकांततः निर्णीता. **2** मुद्रया अंक् 10 or चिह्नयति ( D. ). **3** ( मुद्रया ) पि-धा 3 U, बंध् 9 P; मुखं बध्नाति 's. s the lips'. **-ed,** *a.* मुद्रित, कृतमुद्र, मुद्रांकित, मुद्राबद्ध; 's. ing wax' ला( रा )क्षा; *See* **Lac.**

**Seam,** *s.* संधिः; सीवनं; 's. of planks' काष्ठसंधिः. **2** शुष्कव्रणः. **-y,** *a.* संधियुक्त; 'turn the s. side within' स्वदोषान् प्रच्छादय-निगूह. **-Seamstress,** *s.* सूचिका, सूचिकर्मोपजीविनी.

**Sear,** *v. t.* निर्दह् 1 P, प्लुष् 1 P; दहनेन दृढीकृ or शुष्कीकृ 8 U. **-***a.* संशुष्क, विशीर्ण, म्लान.

**Search,** *v.* ( For ) अन्विष् 4 P, निरूप् 10, अनुसंधा 3 U, मृग् 10 A, मार्ग् 1 P, 10, विचि 5 U, निर्-अव-ईक्ष् 1 A; ( fig. ) निपुणं परीक्ष् or निरूप्; s. into' निरूप्, परीक्ष्; 's. out' अन्विष्य &c. उपलभ् 1 A or प्राप् 5 P. **-ing,** *s.* अन्वेषणं-णा, मार्गणं, निरूपणं, अनुसंधानं, निरीक्षणं, अन्वीक्षणं; विचयः, जिज्ञासा. **-er,** *s.* अन्वेषकः, अन्वेष्टृ *m.*, निरूपकः, निरीक्षकः; 's. of the human heart' पुरुषांतरविद्. **-ing,** *a.* निपुण, सूक्ष्म, अवहित; 'casting at me a s. look' सुनिपुणं मां विलोक्य.

**Season,** *s.* ऋतुः, कालः, समयः; (in general) कालः, वेला, समयः, अवसरः, अवकाशः, प्रस्तावः; 'auspicious s.' लग्नं, मुहूर्तः, शुभवेला,-लग्नं; 'in due s.' काले; 'pertaining to the s.' आर्तव ( वी *f.* ); 'out of s.' अकाले, अनवकाशे; 'in s. and out of s.' कालेऽकाले वा, औचित्यानौचित्यमविचार्य; 'wrong s.' अकालः, अनवकाशः. **-***v. t.* अधि-,वास् 10, उपस्कृ 8 U or स्वादूकृ. **2** पच् 1 P, परिपाकं उत्पद् c., पक्वीकृ; *See* **Mature. 3** ( Accustom ) ex. by परिचय, सहिष्णु, &c.; 's. ed to heat' रविकिरणसहिष्णु (S. 2); 's. s the body to exertions' श्रमजयात् तनुं प्रगुणां करोति ( R. IX. 49 ); 's. ed to exertions' जितश्रम, श्रमसहिष्णु. **-able,** *a.* समयोचित, कालानुरूप, प्रस्तावसदृश ( शी *f.* ), प्राप्तकाल, कालोचित, and sim. comp. **2** कालकृत, काल in. comp.; 's. efforts' कालकृतोद्योगाः. **3** आर्तव ( वी *f.* ), कालोद्भव, ऋतुज, ऋतव्य. **-ableness,** *s.* कालौचित्यं, प्रस्तावसादृश्यं, &c. **-ably,** *adv.* यथाकालं-समयं-अवसरं, काले, समये, प्रस्तावसदृशं, प्राप्तकालं, कालानुरूपं. **-ing,** *s.* उपस्करः, व्यंजनं.

**Seat,** *s.* आसनं, पीठः-ठं; 'take a s. here' अत्र आसनपरिग्रहं करोतु भवान्; पर्यंकः ( s. on a sofa ), विष्टरः ( cane-s. ); आस्तरः-रणं; 'raised s.' वितर्दि-र्दी *f.*, वेदिका. **2** स्थानं, आयतनं, आस्पदं, धामन् *n.*, अधिष्ठानं, निकेतनं, नि-आ-लयः, आगारं, पदं, आशयः; 'capital s.' राजधानी-नगरं; 's. of justice' न्यायासनं, धर्मासनं, व्यवहारासनं; 's. of blood' रक्ताशयः; क्रोधस्थानं; विद्यागारं, &c. **-***v. t.* ( Oneself ) आसने उपविश् 6 P, निषद् 1 P, आसनपरिग्रहं कृ 8 U; ( another ) ( आसने ) उपविश् c., आसनं ग्रह् c., अध्यास् c., अधि-ष्ठा c., ( -ष्ठापयति ). **2** प्रति-ष्ठा c., अधिकृ, अधि-आ-रुह् c., निविश् c.; 'he was s. ed on throne' राजपदमाधिरोपितः, सिंहासने प्रतिष्ठापितः. **-ed,** *a.* आसीन, उपविष्ट, निषण्ण, अध्यासीन; आसनस्थ, आसनस्थित-उपविष्ट-आरूढ-गत-आश्रित, पीठस्थ; 's. at ease' सुखासीन, सुखोपविष्ट; 'be s.' गृह्यतां आसनं, क्रियतामासनपरिग्रहः. **2** प्रतिष्ठित, निविष्ट, स्थित, गत-स्थ-निष्ठ in comp.; 's. in

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007